# SAN102 (दर्शनम्)

**अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्।**
**आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये।।**

## वेदान्तसारे अनुबन्धचतुष्टयम्

अनुबन्धचतुष्टयमिति शब्देन अधिकारी-विषय-सम्बन्ध-प्रयोजनानां बोधो जायते। तत्र अधिकारी पदस्य कोऽर्थः? इति प्रश्ने सति अधिकारी तु विधिवधीतवेदवेदाङ्गत्वेनापाततः अधिगतः अखिलवेदार्थः अस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धिवर्जनपुरस्सरं नित्यनैमित्तिक-प्रायश्चितोपासनानाम् अनुष्ठानेन निर्गित-निखिल-कल्मषतया नितान्तः निर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता एव । अर्थात् अधिकारी तादृशः वर्तते यो चतुर्णां वेदानां तेषाम् अङ्गैः सह सम्पूर्णतया अध्ययनं कृतवान् अस्ति। अपि च अस्मिन् जन्मनि अथवा वर्तमानकाले यत् स्वरूपं स्वीकरोति तत्, जन्मान्तरे इति अन्यस्मिन् जन्मनि अथवा पूर्वजन्मनि काम्यानि अर्थात् स्वर्गादीष्टसाधनानि अर्थात् स्वर्गादिविषयान् सम्प्राप्तुं यानि साधनानि तानि, यथा-ज्योतिष्टोमयज्ञादीनि। निषिद्धकर्म अर्थात् यैः कर्मभिः नरकगमनं भवति तेषां वर्जनम्, यथा- ब्राह्मणहननादीनि। नित्यानि अर्थात् अकरणे अथवा येषां कर्मणा विना प्रत्यवायो जायते अर्थात् पापो जायते तेषां करणम्। नैमित्तिकानि अर्थात् येषां सन्ततिर्न भवति पुत्रादयो न भवन्ति तत्कृते यानि कर्माणि क्रियन्ते, तानि नैमित्तिकानि। प्रायश्चितानि अर्थात् अस्माभिः यानि कान्यपि पापरूपेण क्रियन्ते, तेषां क्षयार्थं कर्मणाम् अनुष्ठानम्, यथा-चान्द्रायणादीनि, चान्द्रायणव्रतं तत् भवति, यस्मिन् शुक्लपक्षे चन्द्रमसं दृष्ट्वा स्वकीयं भोजनग्रासवर्धनं जायते कृष्णपक्षे समागते सति तथैव स्वभोजनग्रासमपि न्यूनं क्रियते। उपासनानि तानि कर्माणि भवन्ति येषु कर्मसु साकारब्रह्मविषये मानसिकरूपेण ध्यानं क्रियते अर्थात् सगुणब्रह्मविषये यत्र चर्चा चलति सैव उपासनाकर्म अभिधीयते। एतेषां नित्यादीनां कर्मणां बुद्धेः शुद्धिरेव परमं प्रयोजनम् उपासनानां कर्मणां तु चित्तस्य एकाग्रयम् **‘तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन’** इत्यादिश्रुतेः **‘तपसा कल्मषं हन्ति’** इत्यादिस्मृतेश्च वाक्यम्। नित्यनैमित्तिकप्रायश्चितोपासनानां कर्मणां तु अपरं फलमिति तदस्ति ‘पितृलोकस्तथा सत्यलोकप्राप्तिः, तत्र श्रुतिवाक्यमपि लभ्यते **‘कर्मणा पितृलोको विद्यया देवलोक’** इति।